# १ पाथेयम्

एकादशवर्गस्य संस्कृतपाठ्यपुस्तके प्रथमम् एककम् भवति पाथेयम्। पथि भोज्यं वस्तु, पथि साधु, पथि व्ययितं द्रव्यं वा पाथेयम्। यथा पथिकः प्रस्थानवेलायां भोजनार्थं धनद्रव्यादिकं वहति तथा जीवितयात्रायाम् अर्णवे कर्णधारः इव भवार्णवे तीरप्रापकम् उपदेशादियुक्तं पाठ्यांशम् अत्र एकके सन्निवेशितम्।

प्रथमं पाठं सुभाषितम् भवति। तत्र पञ्चभिः श्लोकैः धार्मिकानि मूल्यानि प्रतिपादितानि। तानि जीवितसमस्यानाम् अभिमुखीकरणार्थं समर्थानि।

'कर्मणैव हि संसिद्धिः' इति द्वितीये पाठे निषादावस्थातः ऋषित्वं प्राप्तस्य रत्नाकरस्य कथा प्रतिपादिता। अनया महत्वं कर्मणा एव, न तु जन्मना इत्युपस्थापितम्। आदिकाव्यस्य उत्पत्तिसूचनात्मिकया अनया कथया उत्तमकर्मभिरेव औन्नत्यं प्राप्तुं शक्यते इति सन्दिष्टः।

अनूदितकाव्यानां परिचायनाय सीताविचारलहरी नामकात् काव्यात् सप्तश्लोकाः 'पुरतो भ्रम लोकचक्रः' इति तृतीये पाठे आयोजिताः। कैरली- साहित्ये प्रथितं प्रमुखं च भवति कुमारनाशान् महोदयेन विरचितं *चिन्ताविष्टयाय सीता* नामकं खण्डकाव्यम्। श्रीरामस्य दुःखादपि महत्तरं भवति सीतायाः दुःखमिति काव्येन अनेन सूचितम्। भारतीयानां सर्वेषां स्त्रीजनानां मातृकारूपेण सीतायाः चित्रणं कृतमस्मिन् काव्ये। अस्य काव्यस्य संस्कृतानुवादः श्रीमता एन्. गोपालपिल्ला महोदयेन विहितः। ततः उद्धृताः केचन श्लोकाः पाठ्यांशत्वेन कल्पिताः। अत्रत्यः आशयः अपि जीवितयात्रायां पाथेयरूपेण गृहीतुं योग्यः भवति।

## १.१ पाथेयम्

**कालांशः १६**

**पठनाधिगमाः**

१. सूभाषितानि आलपति।
२. जीवितमूल्यानि विशदयति।
३. सुभाषितानाम् आशयं लिखति।
४. पदानाम् अर्थं वदति।
५. पदकोशं रचयति।
६. वृत्तं ज्ञात्वा वदति।
७. सुभाषितानि चित्वा लिखति।
८. वाक्यं परिवर्तयति।
९. सुभाषितमधिकृत्य टिप्पणी लिखति।
१०. सन्धिं विश्लेषयति।

**पठनोपकरणानि**

- सुभाषितानां सान्द्रमुद्रिका
- सारोपदेशकथानां कार्टूण्चलनचित्रम्
- प्रवर्तनपुटम् (worksheet)
- लघुलेखा (hand out)

**मूल्यानि मनोभावाः च**

- ☐ उचितसन्दर्भे सुभाषितस्य प्रयोगः
- ☐ पदकोशरचना।
- ☐ आलपनसामर्थ्यम्।
- ☐ व्यक्तित्वविकासः।
- ☐ उचितनिर्णयस्वीकारः।
- ☐ मानविकताप्रवर्धनम्।
- ☐ सदसद्व्यक्तिविवेकः।
- ☐ फलप्राप्तिपर्यन्तं कर्मनिर्वहणम्।
- ☐ लक्ष्यसाधने अचञ्चलता।

**आमुखम्**

सर्वेऽपि मानवाः जीविते विजयम् इच्छन्ति। जीवितविजयार्थं मानसिकं बौद्धिकं च स्वास्थ्यम् अनिवार्यम्। पूर्वसूरिभिः स्वजीवितार्जितम् अनुभवज्ञानं ग्रन्थेषु सञ्चितम्। सुभाषितानि तु तादृशानाम् अनुभवज्ञानानाम् उद्बोधनानि भवन्ति।

समाजे जनाः मूल्यबोधयुक्ताः भवितु-मर्हन्ति। सुभाषितानि सर्वथा जीवितमूल्यानि उद्बोधयन्ति। विद्या, नीति , धर्मः , सत्यं त्यागसन्नद्धता इत्यादीनि सुभाषितस्य प्रतिपाद्यानि भवन्ति। 'परोपकारः पुण्याय पापाय परपीडनम्, अहङ्कारो विनाशाय, दुष्करं किं महात्मनम्, उद्धरेदात्मनात्मानं नात्मानमवसादयेत् इत्यादीनि प्रासिद्धानि। सौहृदपरस्परा-दरस्नेहकारुण्यत्यागप्रभृतयः उत्कृष्टमानवगुणाः यस्मिन् दृश्यन्ते सः विश्वमानवत्वेन कीर्त्यते। एतादृशानां गुणानाम् उद्घोषणं सुभाषितेषु लभ्यते।

अन्तश्चोदनाः प्रबलीकर्तुमपि सुभाषितानि समर्थानि भवन्ति। उत्तमव्यक्तित्वविकासार्थं सुभाषितानि सर्वथा उपकारकाणि इति निस्संशयम्। अतः जीवितयात्रायां पाथेयमेव सुभाषितम्। जीवितसमस्यानां परिहारार्थम् एतानि सहायकानि भवेयुः ।

प्रभाषणे, उपन्यासरचनायां, वादप्रतिवादेषु, किं बहुना नीतिवेदिकासु स्वपक्षस्य समर्थनाय च सुभाषितानि उपकुर्वन्ति। तथा च सरससंभाषणेष्वपि एतानि साहाय्यकानि भवन्ति। प्रतिलोममनोभावः (negative attitude) न श्रेयस्करः। अनुलोममनोभावस्य (positive attitude) प्रवर्द्धनाय सुभाषितानि समर्थानि भवन्ति।

यथा पथिकस्य क्षुत्पिपासानिवारकं पाथेयं निर्विघ्नयात्रासमाप्त्यै प्रभवति तथा सुदीर्घजीवितयात्रां देशकालावस्थानुरूपं परिसमापयितुम् उत्प्रेरकाणि भवन्ति सुभाषितानि।

**प्रवेशिका**

अध्यापकः छात्रान् सङ्घेषु उपावेशयतु। प्रतिसङ्घं कांश्चन लघुलेखाः ( Handouts) वितरति।

१. भारतीयवार्तापत्रिकासु प्रसिद्धीकृतानां संस्कृत-सम्बन्धिनां वार्तानां सङ्कलनचित्ररूपम् (collage)।

२. देशान्तरेषु संस्कृतभाषायाः स्वीकार्यतां प्रकाश्यमानानां चित्राणां सङ्कलनचित्ररूपम्।

३. सूचनाविनिमयसङ्केतेषु ( Information Communication Technology ) संस्कृतस्य स्थानद्योतकं सङ्कलनचित्ररूपम्।

प्रवर्तमानायां चर्चायाम् अध्यापकः साहाय्यं ददातु। चर्चायाः अन्ते एकैकस्मात् संघात् एकैकः आगत्य आशयान् प्रस्तौतु। अध्यापकः तानंशान् क्रोडीकरोतु। अत्र प्रगल्भेन केनचित् संस्कृतपण्डितेन कृतमेकं प्रभाषणं चलनचित्ररूपेण प्रदर्शयितुमर्हति।

२. छात्रः पठितपूर्वसुभाषितेष्वेकम् आलपतु। पञ्चषाणां छात्राणाम् आलपनान्तरम् इतरे छात्राः आशयान् वदन्तु। तानधिकृत्य अध्यापकः चर्चां चालयतु।

चर्चासूचकाः -

मूल्यानि सन्निविष्टानि किम् ? तानि कानि ?

जीविते तेषां स्थानम्।

मूल्यानां प्रकाशने सुभाषितानां क्षमता।

चर्चायाः अन्ते मूल्यानां सरलबोधने सुभाषितानि उपयुज्यत इति छात्राः अवगच्छन्तु। सुभाषितोक्तान् आशयान् - जीवितमूल्यानि - छात्राः वदन्तु। तानि पट्टिकारूपेण लिखन्तु च। आवश्यकं चेत् अध्यापकः श्यामफलके लिखतु। उदाहरणत्वेन अत्र दीयते -

१. उद्यमेन हि सिद्ध्यन्ति
   कार्याणि न मनोरथैः ।
   न हि सुप्तस्य सिंहस्य

प्रविशन्ति मुखे मृगाः।।

तात्पर्यार्थः - परिश्रमस्य महत्वम्।

२. उत्सवे व्यसने चैव
दुर्भिक्षे प्राणसङ्कटे ।
राजद्वारे श्मशाने च
यस्तिष्ठति स बान्धवः।।

तात्पर्यार्थः - सन्तोषे व्यसने च बन्धुः सहचारी भवति।

३. अष्टादश पुराणेषु
व्यासस्य वचनद्वयं ।
परोपकारः पुण्याय
पापाय परपीडनम् ।।

तात्पर्यार्थः - परोपकारं कुरु , परपीडां मा कुरु ।

अस्यां प्रक्रियायां सुभाषितस्य स्मरणे स्वयंमूल्यनिर्णयं, तथा अन्यत्र अधिसङ्घमूल्यनिर्णयं (peergroup evaluation) च करणीयम्।

**प्रवर्तनम् - १ श्लोकस्य वाचनम्।**

छात्रः सहपाठिनां सहायेन सुभाषितं मौनं पठति। अनन्तरं छात्राः संघशः सस्वरमालपन्ति। बालकस्य श्रवणानुभवार्थम् अध्यापकः स्वयम् आलपति। अथवा सान्द्रमुद्रिकादीनां साहाय्येन छात्रान् श्रावयति ।

**प्रवर्तनम् -२ पदानां विश्लेषणम्।**

छात्राः सङ्घे उपविश्य संयुक्तपदानि चित्वा लिखन्ति।

**अधिकविस्तरांशः**

**अद्यैव** - अत्र अकारस्य एकारस्य च संयोगे ऐकारादेशः , वृद्धिसन्धिः इति सन्धेः नाम ।

चितानि एकैकस्मात् संघात् एकैकः आगत्य कक्षायां प्रस्तौति। अध्यापकः स्खालित्यानि निवारयति। छात्रः तदवगत्य विश्लेषयित्वा च प्रवर्तनपुस्तिकायां (Activity Log) लिखतु।

**प्रवर्तनम् -३ पदार्थलेखनम् ।**

नूतनपदानां लेखनाय निर्दिशति। पुस्तकस्थव्याख्यासाहाय्येन तदर्थानपि स्वीयप्रवर्तनपुस्तिकायां लिखति।

**व्याकरणविशेषाः**

**खादन्नपि** - खादन् + अपि इतिस्थिते 'ङमोह्रस्वादचि ङमुण्नित्यम्' इति ङमुड् ( नुट् ) आगमः ।

**स्वभाव एवैष**

एव + एष इत्यत्र अकार एकारयोः ऐकार एकादेशः ( वृद्धिरेचि) एवैष इति रूपम् । स्वभाव स् एवैष ससजुषोरु ः इति सकारस्य रुत्वे , स्वभाव र् एवैष 'भो भगोऽधोऽपूर्वस्य योऽशि' इति रेफस्य यकारे स्वभाव य् एवैषः। 'लोपः शाकल्यस्य' इति यकारस्य विकल्पेन लोपो स्वभाव एवैष। यलोपाभावे स्वभावयेवैषा।

**प्रवर्तनम् -४ व्यवहाररूपपरिवर्तनम्।**

श्लोकस्थपदानि पदार्थान् च प्रत्यभिज्ञाय छात्राः श्लोकं गद्यरूपेण परिवर्तयन्तु। अन्वयक्रमः अनुवर्तनीयः इत्यतः अध्यापकस्य सहायं तत्र भवतु। छात्राः सर्वेषां सुभाषितानां गद्यरूपाणि अवगत्य लिखन्तु। कक्ष्यायां प्रस्तुवन्तु। अध्यापकस्य साहाय्येन समीकृत्य स्वकीयाणां प्रवर्तनपुस्तिकायां लिखन्तु। अध्यापकमूल्यनिर्णयसूचिका -

पदार्थज्ञानम् , आशयावगमः , उचिता भाषा।

**प्रवर्तनम् -५ आशयलेखनम् ।**

लिखितं गद्यरूपं मनसि निधाय श्लोकस्य आशयं छात्रः वदति । छात्राः पुस्तके लिखन्तु । अध्यापकेन मूल्यनिर्णयः कार्यः।।

मूल्यनिर्णयसूचिका -

आशयस्य समग्रता , व्यक्तता, उचिता भाषा च।

एवं पञ्च सुभाषितानि छात्राः अवगच्छन्तु आशयान् लिखन्तु च।

**प्रवर्तनम् -६, श्लोकस्य संघशः आलपनम्।**

छात्राः इदानीं सुभाषितानि पठितवन्तः श्रुतवन्तः सम्यक् अवगतवन्तश्च। अतः छात्राः श्लोकान् सस्वरं सतालम् आलपन्तु। अधिसङ्घमूल्यनिर्णयः कार्यः ।

मूल्यनिर्णयसूचिका-

उच्चारणशुद्धिः, भावः ।

**प्रवर्तनम् -७ प्रवर्धमानपदकोशनिर्माणम्।**

छात्राः सुभाषितपठनावसरे नूतनशब्दान् तदर्थांश्च लिखितवन्तः ।तानि पदकोशे योजयेत्। अध्यापकः संस्कृतनिघण्टुमानीय परिचयं कारयतु। छात्रः तत्रस्थविशेषताः परिचिनोतु। एवम् अकारादिक्रममनुसृत्य छात्रः प्रवर्धमानशब्दकोशं निर्मातु। अध्यापकः अपेक्षितसाहाय्यं ददातु। अध्यापकेन मूल्यनिर्णयोऽपि कार्यः। मूल्यनिर्णयसूचिका- पदक्रमः, पदार्थबोधः।

**प्रक्रियेयं आवर्षं प्रतिपाठं प्रवर्धमानरूपेण अनुवर्तयेत्। सञ्चिकायां (Portfolio) निवेशयतु च।**

**पाथेयम्** - पथिन् शब्दात्
'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति सूत्रेण ढञ् प्रत्ययः। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति ढस्य एयादेशे विभक्तिकार्ये पाथेयम् इति रूपम्।

**प्रवर्तनम्- ८ सुभाषितानां सूक्तीनां च चयनम्।**

अध्यापकः छात्रान् सङ्घेषु विभज्य आवश्यकानि पुस्तकानि , सूक्तिपुटं वा प्रतिसङ्घं वितरतु।

संस्कृतभाषायाम् उत मातृभाषायां विद्यमानेषु सुभाषितेषु, सूक्तिषु च समानाशययुक्तानां चयनं कृत्वा उच्चैः पठतु। इतरे छात्राः तत् श्रुत्वा मूल्यनिर्णयं कुर्वन्तु। टिप्पणीपुस्तके लिखन्तु। अधिसङ्घमूल्यनिर्णयसूचिका-

आशयसाम्यता, व्यक्तता च।

**प्रवर्तनम् - ९ आशयस्वांशीकरणम् ।**

पाथेयमिति शीर्षकस्य औचित्यं कथमिति चर्चां कृत्वा सुभाषितानाम् आशयस्वांशीकरणम्। अध्यापकः चर्चायाम् उपशामकः (modarator) भवति। पाथेयमिति पदस्य व्युत्पत्तिः तदाशयश्च अध्यापकेन उच्यताम्।

चर्चासूचिका - पथि साधु / पथि योग्यं वा पाथेयम्, मूल्यानां स्वांशीकरणम् ,भूतपूर्वघटनाः जीविते उपयोगिता । चर्चासंग्रहं पुस्तके लिखतु । अध्यापकः मूल्यनिर्णयं करोतु।

मूल्यनिर्णयसूचिका-

आशयव्यक्तता, आशययोजनम्, भाषासामर्थ्यम् , चर्चायां भागग्राहिता।

**प्रवर्तनम् - १० वर्तमानकालक्रियापदानां पट्टिकाकरणम्।**

पाठभागे लट्लकारपदानि लोट्लकारपदानि च सन्ति। लोट्लकारं छात्रं व्यवहाररूपैः परिचाययतु। यथा - भवान् उत्तिष्ठतु, आगच्छतु, पठतु, इत्यादि। तानि लटि परिवर्त्य वदतु । छात्रः परिचिनोतु । अत्र सोपानस्य उपयोगः कार्यः। अनन्तरं छात्रेभ्यो क्रियापुटं दत्वा प्रदत्ताभ्यासाय निर्दिशतु।

अधिसङ्घमूल्यनिर्णयः कार्यः।

**भयङ्करः**

भयं करोति इति भयङ्करः‘मेघर्तिभयेषु कृञः’ इति सूत्रेण भयशब्दपूर्वस्य कृञ् धातोः खच् प्रत्ययः। अङ्गस्य गुणे भय कर। ‘अरुद्विषदजन्तस्य मुम्’ इति मुमागमे भयम् करः। ‘मोऽनुस्वारः इत्यनुस्वारे’, ‘अनुस्वारस्य ययि परसवर्णः’ इति अनुस्वारस्य परसवर्णत्वेन ङकारे विभक्तिकार्ये च भयङ्करः इति रूपम् ।

**तृणं न खादन्नपि जीवमानः -** जीव् धातोः परस्मैपदित्वात् शतृ प्रत्यय एव युक्तः। तथा जीवन् इत्येव रूपं स्यात्। अत्र तु जीवमान इति शानच् प्रत्ययः कवेः निरङ्कुशत्वम्।

**प्रवर्तनम् - ११ वृत्तपरिचयः**

पठितपूर्वान् श्लोकान् आलपन्तु। अत्रत्यां विभिन्नतां प्रति सङ्घे चर्चां करोतु। सूचिका - अत्र आलपने साम्यं कयोर्मध्ये वर्तते ? गद्यपद्ययोर्मध्ये भेदः कः ?

अनन्तरम् अध्यापकः क्रोडीकरोतु।

क्रोडीकरणबिन्दवः -

समानवृत्तेषु आलपनसाम्यं वर्तते। पद्यं नियतवर्णं तालात्मकञ्च।

## चतुष्षष्ठिः (६४) कलाः

१. गीतम् २. वाद्यम् ३. नृत्यम् ४. नाट्यम् ५. आलेख्यम् ६. विशेषकच्छेद्यम् ७. तण्डुलकुसुमबलिविकाराः ८. पुष्पास्तरणम् ९. दशनवसनाङ्गरागाः १०. मणिभूमिकाकर्म ११. शयनरचनम् १२. उदकवाद्यम् १३. उदकघातः १४. चित्रायोगाः १५. माल्यग्रथनविकल्पाः १६. शेखरापीडयोजनम् १७. नेपथ्ययोगाः १८. कर्णपत्रभङ्गाः १९. गन्धयुक्तिः २०. भूषणयोजनम् २१. ऐन्द्रजालम् २२. कौचुमारयोगाः २३. हस्तलाघवम् २४. चित्रशाखापूपभक्ष्यविकारक्रियाः २५. पानकरसरागासवयोजनम् २६. सूचीवापकर्माणि २७. सूत्रक्रीडा २८. प्रहेलिका २९. प्रतिमाला ३०. दुर्वचकयोगाः ३१. पुस्तकवाचनम् ३२. नाटिकाख्यायिकादर्शनम् ३३. काव्यसमस्यापूरणम् ३४. पट्टिकवेत्रवाणविकल्पाः ३५. तर्कुकर्माणि ३६. तक्षणम् ३७. वास्तुविद्या ३८. रूप्यरत्नपरीक्षा ३९. धातुवादः ४०. मणिरागज्ञानम् ४१. आकरज्ञानम् ४२. वृक्षायुर्वेदयोगाः ४३. मेषकुक्कुटलावकयुद्धविधिः ४४. शुकशारिकाप्रलापनम् ४५. उत्साधनम् ४६. केशमार्जनकौशलम् ४७. अक्षरमुष्टिकाकथनम् ४८. म्लेच्छितकविकल्पाः ४९. देशभाषाज्ञानम् ५०. पुष्पशाकटिकानिमित्तज्ञानम् ५१. यन्त्रमातृका ५२. धारणमातृका ५३. सम्पाठ्यम् ५४. मानसीकाव्यक्रिया ५५. क्रियाविकल्पाः ५६. छलितकयोगाः ५७. अभिधानकोशछन्दोज्ञानम् ५८. वस्त्रगोपनानि ५९. द्यूतविशेषः ६०. आकर्षक्रीडा ६१. बालकक्रीडनकानि ६२. वैनायिकीनां विद्यानां ज्ञानम् ६३. वैजयिकीनां विद्यानां ज्ञानम् ६४. वैतालिकानां विद्यानां ज्ञानम्।

## अधिकप्रवर्त्तनानि

१) अष्टाधिकजीवितमूल्यानां पट्टिकां कृत्वा तदाशयप्रतिपादकानि सुभाषितानि सञ्चिनोतु।

२) मूल्याधिष्ठितजीवितवृत्तिं स्वांशीकृतवन्तः बहवः महात्मानः सन्ति।पाठभागे विद्यमानानि जीवितमूल्यानि आधारीकृत्य तादृशानां महात्मनां कथां सञ्चिन्वतु।

३)आधुनिकजीवने मूल्यसोषणं अनुभूयन्ते इति सर्वत्र स्रूयते।एतत् अधिकृत्य संघचर्चां कृत्वा टिप्पणीं लिखन्तु।

४)सुभाषितानं सद्यप्रदर्शिनीः(०) निर्मातु।

# प्रश्नावली

**१. अधः प्रदत्तं श्लोकं सम्यक् पठत। प्रदत्तानां प्रश्नानामुत्तराणि च लिखत।**

क) निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

१. निन्दन्तु स्तुवन्तु वा के?
२. समाविशतु गच्छतु वा यथेष्टम् का?
३. न्याय्यात् पथः पदं न प्रविचलन्ति के?
४. श्लोकस्य आशयं स्ववाक्येषु लिखत।

ख) भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

१. फलागमैः नम्राः भवन्ति के?
२. सत्पुरुषाः समृद्धिभिः कीदृशाः भवन्ति?
३. सज्जनाः इत्यर्थे प्रयुक्तं पदं किम्?
४. श्लोकस्य आशयं स्ववाक्येषु लिखत।

ग) प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति।।

१. विघ्नभयेन कैः न प्रारभ्यते?
२. के प्रारभ्य विघ्नविहता विरमन्ति?

३. विघ्नैः प्रतिहन्यमानाः अपि प्रारब्धं के न परित्यजन्ति?

४. श्लोकस्य आशयं स्ववाक्येषु लिखत।

**२. क) क विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं ख विभागादुद्धृत्य लिखत।**

| **क विभागः** | **ख विभागः** |
|---|---|
| १. साहित्यसङ्गीतादिषु विमुखः जनः जन्तुरेव भवति। | निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु<br>लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।<br>अद्यैव वा मरणमस्तु युगान्तरे वा<br>न्याय्यात् पथः प्रविचलन्ति पदं न धीराः। |
| २. दुर्जनानां सज्जनानां मैत्री विभिन्ना। | साहित्यसङ्गीतकलाविहीनः<br>साक्षात्पशुः पुच्छविषाणहीनः<br>तृणं न खादन्नपि जीवमान-<br>स्तद्भागधेयं परमं पशूनाम्।। |
| | आरम्भगुर्वी क्षयिणी क्रमेण<br>लघ्वी पुरा वृद्धिमती च पश्चात्।<br>दिनस्य पूर्वार्द्धपरार्द्धभिन्ना<br>छायेव मैत्री खलसज्जनानाम्।। |

**ख) क विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं ख विभागादुद्धृत्य लिखत।**

| | |
|---|---|
| १. धीराः न्यायमार्गात् पदं न प्रतिचलन्ति। | निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु<br>लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।<br>अद्यैव वा मरणमस्तु युगान्तरे वा<br>न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।। |

२. परोपकारिणः समृद्धौ विनयान्विताः।

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमान-
स्तद्भागधेयं परमं पशूनाम्।।

**३. प्रदत्तेषु भवतः इष्टतमं सुभाषितं किम् इति सकारणं लिखत ।**

१ प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति।।

२ भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

**४. अधः प्रदत्तं श्लोकं पठित्वा आशयं विशदयत।**

१ निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।

२ आरम्भगुर्वी क्षयिणी क्रमेण

लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।।

**५. उदाहरणानुसारं अघोदत्तानि वाक्यानि परिवर्तयतु ।**

उदा -छात्राः पठन्तु।          छात्राः पठन्ति।

१. दुर्जनाः निन्दन्तु।          .....................।

२. सज्जनाः स्तुवन्तु।          .....................।

३. लक्ष्मीः समाविशतु।        ......................।

**६. कोष्ठकात् उद्धृत्य लिखत।**

१. साहित्यसङ्गीतकलाविहीनः साक्षात्..................... अस्ति।

(पुरुषः, पशुः, वृक्षः)

२. आरम्भगुर्वी क्षयिणी क्रमेण। कस्य मैत्री ।

(खलस्य, साधोः, मृगस्य.)

३. न्याय्यात् पथः पदं न प्रविचलन्ति। के?

(मूर्खाः, चोराः, धीराः.)

४. फलागमै नम्राः भवन्ति। के?

(तरवः, सत्पुरुषाः, दुर्जनाः)

५. विघ्नभयेन न प्रारभ्यते। के?

(नीचाः, उत्तमाः, मघ्यमाः)

**७. उदाहरणानुसारं विश्लेषयत।**

उदा- पठन्नपि - पठन् + अपि

१. खादन्नपि -................+....................

उदा- तत्तैव - तत्र + एव

२. अद्यैव -................+....................

उदा- बालास्तत्र - बालाः + तत्र

३. नम्रास्तरवः -................+.....................

उदा - पुनरयम् - पुनः +अयम्

४. पुनरपि -................+.....................

उदा- मातेव - माता + इव

५. छायेव -................+.....................

**८. यथोचितं योजयत।**

| **क** | | **ख** |
|---|---|---|
| घनाः | - | वृक्षाः |
| तरवः | - | दुष्टः |
| अम्बु | - | मेघाः |
| खलः | - | अहः |
| दिनम् | - | जलम् |

# १.२ कर्मणैव हि संसिद्धिः

**कालांशः १६**

**पठनाधिगमाः**

१. गद्यपाठं पठति।
२. संश्लिष्टपदानि लिखति।
३.पदानि शब्दकोशे निवेशयति।
४. रामायणोत्पत्तिकथां प्रस्तौति।
५. कथां भावात्मकतया अवतारयति।
६. कथास्तम्भं क्रमीकरोति।
७. कथांशस्य सम्भाषणं लिखति।

**पठनोपकरणानि**

■ प्रभाषणस्य सान्द्रमुद्रिका/ मुद्रितपुटम्
■ प्रवर्तनपुटानि

**मूल्यानि मनोभावाश्च**

□ उचिते सन्दर्भे पठितांशस्य प्रयोगः।
□ भारतीयसंस्कृतेः अवगमनम् ।
□ कर्मणः महत्वावगमनम्।
□ काव्यं कविं चाधिकृत्य आदरः।
□ महतां अनुवर्तनम्।
□ अपराधः पापाय इति विवेकः।

**आमुखम्**

संस्कृतसाहित्ये सर्वोत्कृष्टं ग्रन्थद्वयं रामायणं महाभारतञ्च भारतीयीनां जीवितादर्शभूतं भवति। एतद्द्वयमपि भारतीयभाषासाहित्यकृतिषु अतितरां प्रभावमावहति। भारतीयानां जीवितचर्यासु दैनन्दिनकर्मसु च एतयोः स्थानं महत्तरमेव। आदिकाव्यत्वेन रामायणं आदिकवित्वेन तत्कर्ता वाल्मीकिश्च सर्वैरङ्गीकृतम्। न केवलं भारतवर्षे रामायणकथायाः प्रचारः किन्तु कम्बोडियासिंहलादिषु मध्यदक्षिणपौरस्त्यदेशेष्वपि प्रचारोऽस्ति। देशकालावस्थापेक्षित्वात् भारते लोके च अनल्पाः रामायणपाठाः तत्र तत्रोपलभ्यन्ते। वैदिकसाहित्यादारभ्य इतः पर्यन्तं यत्सर्वं संस्कृतवाङ्मयं तस्मिन् साहित्यमर्मज्ञैः प्रथमतया काव्यत्वेन कीर्तितमित्यतो रामायणमादिकाव्यमिति निस्तर्कः।

अतिप्रसिद्धस्य अस्य रामायणस्य रचनया एव वाल्मीकिः लोके एतावत् विश्रुतो अभूत्। रामायणे दृश्यमानाः पितापुत्रबन्धः, साहोदर्यं, भार्याभर्तृबन्धः, शासकशास्यबन्धः, पशुपक्षिस्नेहः, सर्वत्र परस्परादरः, समर्पणबोधः, त्यागशीलता च सर्वादरणीयाः गुणाः एव। अनुकरणीयानि गुणवैशिष्ट्यानि बहूनि उपलभ्यन्ते।

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।’ इत्ययं श्लोकः रामायणकाव्यस्य रचनाहेतुं प्रपञ्चयति। यो निषादः पूर्वं पदगेभ्यः धनमपहृत्य जीवितं यापितवान् स एव क्रौञ्चस्य वधं दृष्ट्वा मा निषाद इति हिंसानिषेधपूर्वकं शशाप। अत्र हिंसया एकस्य विरहः तज्जन्यः शोकः तस्माज्जातः श्लोकश्च आदिकाव्यस्य बीजभूतो भवति। मानवः पापकर्मणः स्वयमेव विमुच्य उत्कृष्टतां प्राप्तुं शक्नोति इत्यस्य निदर्शनमेवैतत्। अर्थात् कविः स्वजीवितेन मानवानामस्माकं कर्मणा कथं संसिद्धिं प्राप्तुं शक्यते इति प्रदर्शितवान्। रामः कुटुम्बस्य कृते स्वकीयं सुखं त्यक्तवान्। अनन्तरं राष्ट्रस्य कृते परिवारप्रतिपत्तिश्च परित्यक्तवान्। उत रावणः व्यक्तिगतसुखार्थं बन्धुजनान् गुरुजनान् स्वराष्ट्रस्य सुस्थितिञ्च व्यगणयत्। रामादिवत् वर्तितव्यं न तु रावणादिवदिति रामायणात् स्वांशीकर्तुं शक्यते। उत्कृष्टमानवीयगुणान् परिवर्धयितुं स्वजीविते प्रवृत्तिपथमानेतुम् उत्तमजीवितमूल्यानि प्रत्यभिज्ञातुञ्च रामायणकाव्यपठनं सर्वथा अनिवार्यम्। निरक्षरस्यासंस्कृतस्य च चण्डालस्य ऋषिप्रेरणया हिंसाकर्मभ्यः विरतिः शमदमध्यानमार्गेण ऋषित्वप्राप्तिश्च कर्मणैव हि संसिद्धिरित्यनेन सूचितम्। उत्तमकर्मभिः औन्नत्यप्राप्तिरिति यावत्। यद्यपि पूर्वं निषादत्वेन वासः पश्चात् उत्तममूल्यानि स्वांशीकृत्य जीवितपथेषु प्रवृत्तः तद्वारा ऋषित्वम् एवं श्रेष्ठकाव्यरचनया लोके चिरप्रतिष्ठां च प्राप।

## प्रवेशिका

### भाषणं श्रुत्वा पठित्वा वा चर्चा

अध्यापकेन भाषणांशः सङ्घे पठनाय दीयते। तत्पठित्वा चर्चासूचकानां साहाय्येन छात्राः चर्चां कुर्वन्तु।

चर्चासूचिका- विश्वे रामायणस्य प्रचारः। इतरेषु साहित्यविभागेषु रामायणस्य उपजीव्यता। चलच्चित्रादिषु दृश्यरूपेषु कथाबीजत्वेन रामायणस्य साङ्गत्यम्।

क्रोडीकरणम् - आसेतुहिमाचलं भवति रामायणस्य प्रसिद्धिः। साहित्यकलादिषु उपजीव्यता। दैनन्दिनजीवने प्रभावः।

अधिसङ्घमूल्यनिर्णयसूचिका - रामायणस्य अद्यतनी दशा?

**अधिकविस्तरांशः-**

एव शब्दस्य अवधारणमर्थः

## प्रवर्तनम् १ - कथावाचनम्।

पाठपुस्तकस्थपेटिकायां प्रदत्तं वाक्यम् उद्धृत्य तदनुसारं प्रश्नं करोतु। उत्तराय छात्रः निर्दिष्टकथाभागं वाचयतु। अनन्तरं श्रवणार्थं पाठभागस्य उच्चैः वाचनमावश्यकम्।

छात्राणां वाचनानन्तरम् अध्यापकः भावात्मकतया वाचयतु।

अध्यापकः मूल्यनिर्णयं करोति।

सूचिका - वाचने क्लिष्टता वर्तते किम्?

उच्चारणं शुद्धं वा?

परिहारनिर्देशः - सहपाठिनः वा अध्यापकस्य साहाय्येन वाचनम्।

**प्रवर्तनम् २ - पदविवेचनम्।**

पाठभागे विद्यमानानि संश्लिष्टपदानि नूतनपदानि च विविच्य पट्टिकायां लिखत। क्रियापुटमत्र दातव्यम्।**(क्रियापुटम् - १)**

अधिसङ्घमूल्यनिर्णयः कार्यः।

मूल्यनिर्णयसूचिकाः -

१. पाठभागे विद्यमानानि संश्लिष्टपदानि सर्वाण्यपि लिखितानि किम्?

२. कति नूतनपदानि विद्यन्ते?

नूतनपदानामर्थं ज्ञात्वा प्रवर्धमानशब्दकोशे निवेशयन्तु।

**प्रवर्तनम् ३- प्रश्नानामुत्तरलेखनम्।**

पाठभागं पठित्वा प्रदत्ते क्रियापुटे **(क्रियापुटम् - २)** विद्यमानानां प्रश्नानाम् उत्तराणि लिख्यन्ताम्। यथावसरं साहाय्यमपि दातव्यम्। सङ्घे चर्चां कृत्वा उत्तराणि लिखन्तु।

अधिसङ्घमूल्यनिर्णयसूचिका -

१.समुचितमुत्तरम्।

२.चर्चायां भागभागित्वम्।

प्रश्नानाम् (क्रियापुटम् -२) उत्तराणि -

१. सप्तर्षयः।

२. रत्नाकरः।

३. अपहृत्य।

४. स्वेन कृतस्य कर्मणः फलं स्वेनैव भोक्तव्यमिति कलत्रवचनं निशम्य।

५. तपः।

६. राममन्त्रम्।

७. मुनिश्रेष्ठम्।

८. शाश्वतीः प्रतिष्ठां मा गम।

परिहारबोधनप्रवर्तनम् - उपप्रश्नान् मध्ये मध्ये सूचनाश्च दत्वा उत्तरं प्रति नयतु।

**प्रवर्तनम् - ४**

**भावात्मकवाचनं कथास्तम्भक्रमीकरणञ्च।**

प्रथमम् अध्यापकः कथां भावात्मकतया वाचयतु। अनन्तरं लब्धान् कथास्तम्भान् चर्चां कृत्वा क्रमीकुर्वन्तु।

**कथास्तम्भाः**

क) वत्सेति सम्बोधनया निषादस्य मनः आर्द्रमभवत्।

ख) भार्यायाः प्रतिवचनं निशम्य खिन्नोऽभवत्।

ग) खड्गं प्रसार्य कश्चन निषादः आपतत्।

घ) पश्चात्तापविवशः मुनीनां पुरतः अतिष्ठत्।

ङ) पापफलं कलत्रपुत्रादयः अनुभवन्ति वा? इति मुनिरवदत्।

सङ्घे चर्चां कृत्वा उत्तराणि लिखन्तु।

अधिसङ्घमूल्यनिर्णयसूचिका -

१. कथानुसारं क्रमीकृत्य लेखनम्।

२. चर्चायां भागभागित्वम्।

**प्रवर्तनम् ५ - कथाभागस्य सम्भाव्य लेखनम्।**

सप्तर्षीणां निर्देशानुसारं निषादः गृहमगच्छत् - अनन्तरभागं कक्ष्यायां छात्रः वदतु। तच्छ्रुत्वा द्वित्राः गृहे किं किं भवेदिति स्वभावनां प्रकटयन्तु। तत्र प्रवृत्तं सम्भाषणं एकैकः लिखतु। पश्चात् सङ्घे चर्चां कृत्वा क्रोडीकृत्य च द्वित्राः अवतारयन्तु।

अधिसङ्घमूल्यनिर्णयसूचिका -

१) भावना।

२) सम्भाषणशैली।

**प्रवर्तनम् ६ - आस्वादनलेखनम्।**

पाठं पठित्वा छात्राः तदन्तर्गतानि मूल्यानि प्रवर्तनपुस्तिकायां लिखन्तु। ततः मूल्यानि आधारीकृत्य अध्यापकेन प्रदत्तसूचिकाः च स्वीकृत्य कथायाः आस्वादनं पुस्तिकायां लिखन्तु।

सूचिका -

निषादस्य ऋषित्वप्राप्तिः।

काव्यरचना।

अभिवन्द्यता।

लोके चिरस्थायित्वम्।

शीर्षकस्य औचित्यम्।

अध्यापकमूल्यनिर्णयसूचिकाः -

आशयपूर्णता।

भाषाशैली।

**अधिकविस्तरांशः -**

सप्त च ते ऋषयः सप्तर्षयः। पञ्च च ते पाण्डवाः पञ्चपाण्डवाः। अत्र संख्यापूर्वत्वेऽपि द्विगुर्न भवति संज्ञात्वात्। तत्पुरुष एव। अन्यथा तत्र एकत्वनपुंसकत्वापत्तिः। यथा पञ्चगवम्।

**प्रवर्तनम् ७- विभक्तेः पट्टिकालेखनम्।**

पाठभागात् प्रथमाद्वितीयाविभक्त्यन्तपदानि विविच्य पट्टिकां कुरुत। अनुबन्धे प्रदत्तानि शब्दरूपाणि दातव्यानि।(**क्रियापुटम् -३**)

अधिसङ्घमूल्यनिर्णयसचिका -

१) पाठभागान्तर्गतानि सम्पूर्णानि उदाहरणानि समाकलितानि।

परिहारबोधनप्रवर्तनम्-अधिकोदाहरणानि दत्त्वा सङ्घाङ्गानां साहाय्येन पट्टिकापूरणार्थं प्रेर्यन्ताम् ।

## देशविदेशेषु विद्यमानानां रामायणानां सूचना।

१) कम्बोडिया - राम्केर
२) तायिलान्ड् - रामाक्येन
३) लावोस् - फ्रा लक
४)म्यान्मर् - याम सदाव्
५) मलेष्या - हिकायत् सेरी रामा
६) जावा - कक्काविन् रामायण
७) फिलिप्पैन्स् - महाराद्य लावण
८) नेप्पाल् - सिद्धि रामायण,
९) भानुभक्तको रामायणम्

**भारतेषु -**

१०) आन्ध्रा - श्रीरङ्गनाथरामायणम्
११) तमिल्नाडु - कम्परामायणम्
१२) कर्णाटक - कुमुदेन्दुरामायणम्,
१३) अद्भुतरामायणम्
१४) कुमारवाल्मीकितोरवेरामायणम्,
१५) रामचन्द्रचरितपुराणम्
१६)आसाम् - सप्तकाण्डरामायणम्,
१७) आसमीस् कोथारामायणम्
१८) बङ्गाल् - कृत्तिवासिरामायणम्
१९)ओरीसा- ओरियादण्डिरामायणम्,
जगमोहन् रामायणम्

२०) महाराष्ट्रा - भावार्थरामायणम्
२१) गोवा - रामायणु
२२) हिन्दी - रामचरितमानस्
१३) केरलम् - अध्यात्मरामायणम्
किलिप्पाट्ट्,
१७) माप्पिलरामायणम्
१८) गुजरात्त् - तुल्सीकृतरामायणम्
१९) उरुदू - पोत्तीरामायणम्
२०) काश्मीर् - रामावतारचरितम्
२१) टिबट्ट् - दशरथजातकम्

**अन्याः -**

२२)पौमचर्यम्,
२३) चम्पूरामायणम्,
२४) आनन्दरामायणम्,
२५) मन्त्ररामायणम्,
२६) गिरिधररामायणम्,
२७) भास्कररामायणम्,
२८) गोबिन्दरामायणम्,
२९) राधेश्यामरामायणम्,
३०) रामायणमञ्जरी।

**क्रियापुटम् - १**

| नूतनपदम् | संश्लिष्टपदम् |
| --- | --- |
| खड्गम् | तत्रैव |

**क्रियापुटम् - २**

| **प्रश्नाः** | **उत्तराणि** |
| --- | --- |
| १. के गर्जनं श्रुत्वा चकिताः अभवन्? | ............................ |
| २. निषादस्य नाम किम्? | ............................ |
| ३. निषादः कथं कुटुम्बं पोषयति स्म? | ............................ |
| ४. कुतः निषादः खिन्नोऽभवत्? | ............................ |
| ५. सप्तर्षीणां निर्देशानुसारं निषादः किमकरोत्? | ............................ |
| ६. प्रत्यागताः सप्तर्षयः किमाकर्ण्य विस्मिताः? | ............................ |
| ७. सप्तर्षयः वल्मीके कमपश्यन्? | ............................ |
| ८. वाल्मीकिः क्रौञ्चवधं दृष्ट्वा कथं शशाप? | ............................ |

**क्रियापुटम् - १**

| प्रथमा | द्वितीया |
|---|---|
| सप्तर्षयः | प्राणान् |
| सः | खड्गं |
| चकिताः | गर्जनम् |

## अधिकप्रवर्त्तनानि

१) न तु जन्मना किन्तु कर्मणा इत्याशयप्रत्पादकं कथासम्पुटं निर्मातु।

२) मानवेषु अन्तर्लीना नैपुणी स्वप्रवृत्ता पूर्णतां यान्ति।वाक्यमिदं विशदीकुरुत।

३)कथाभागस्य नाटकाविष्कारं कुर्वन्तु।

## प्रश्नावली

**१. खण्डिकां पठित्वा प्रदत्तानां प्रश्ननानाम् उत्तराणि लिखत।**

"अतीतेषु बहुषु संवत्सरेषु नेनैव मार्गेण प्रत्यागताः ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः। मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयस्तदभञ्जयन्। तदा अतितेजस्विनं कञ्चन मुनिश्रेष्ठम् अपश्यन्। तदा ते 'वाल्मीके ! उत्तिष्ठ सिद्धोऽसि' इत्यवदत्। निषादत्वात् ऋषित्वं प्राप्तस्य तस्य पुरतः ऋषयः साष्टाङ्गं प्राणमन् "।

१) तेनैव मार्गेण प्रत्यागताः के?

२) मुनयः किम् आकर्ण्य विस्मिताः अभवन्।

३) मुनयः किम् अवदन्?

४) सिद्धोऽसि - सिद्धः + ...............।

५) व्याधः इत्यर्थे प्रयुक्तं पदं किम्?

**२. कथास्तम्भान् क्रमीकुरुत।**

१) वाल्मीकिः तमसानदीतीरे वासम् आरभत।

२) पश्चात्तापपरवशः रत्नाकरः मुनेः पादयोः प्राणमत्।

३) सप्तर्षयः वल्मीके अतितेजस्विनं कञ्चन मुनिश्रेष्ठं अपश्यन्।

४)भार्यादीनां प्रतिवचनं निशम्य निषादः नितरां खिन्नोऽभवत्।

५)मुनेः वत्स इति सम्बोधनया निषादस्य हृदयम् आर्द्रम् अभवत्।

**३. वसिष्ठरत्नाकरयोः मिथः भाषणं सभाव्य लिखत।**

वसिष्ठः - भवान् कः?

रत्नाकरः - ......................।

वसिष्ठः - किमर्थं पथिकानां धनानि अपहरसि?

रत्नाकरः - ......................।

वसिष्ठः - कुटुम्बपालनार्थं धनापहरणं किं न पापाय?

रत्नाकरः - .........................।

वसिष्ठः - भवतः कलत्रपुत्रादयः पापस्य फलभाजः किम्?

रत्नाकरः. - .............................।

वसिष्ठः - न जानासि चेत् पृष्ट्वा आगच्छतु।

रत्नाकरः - .............................।

**४. प्रदत्तां खण्डिकां पठित्वा अधोरेखाङ्किततानां पदानां समानार्थकपदानि कोष्ठादुद्धृत्य लिखत।**

भवदीयं सर्वं प्रयच्छत। नो चेत् प्राणान् हरिष्याम्यहम्। कानननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन्। झटिति तीक्ष्णं रक्तपङ्किलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत्। सर्वमपि प्रयच्छत सः उच्चैराक्रोशत्।
(सत्वरम्, निशम्य, व्याधः, भीताः)

**५. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१) आदिकाव्यं किम्?(महाभारतम्,रामायणम्,भागवतम्)

२) आदिकविः कः ?(वाल्मीकिः, व्यासः, कालिदासः)

३) रामायणस्य कर्ता कः ? (वाल्मीकिः, व्यासः, भासः)

४) कानननमध्यात् —————————— श्रुत्वा ऋषयः चकिताः अभवन्?
(रोदनम्,गर्जनम्,हासम्)

५) रत्नाकरो नाम निषादोऽहम्। निषादशब्दस्य कोऽर्थः?
(राक्षसः, चण्डालः, दानवः)

६) तत्रैव अस्य पदच्छेदः कः?
(तत्र +एव, तत्रे+ एव, तत्रै +व)